National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(48): 201-203
© 2023 NJHSR
www.sanskritarticle.com

**डा. पराशरं भावनारायणाचार्यः**
श्रीवैखानसागमव्याख्याता,
श्रीवैखानसागमविभागः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**डा. पराशरं भावनारायणाचार्यः**
श्रीवैखानसागमव्याख्याता,
श्रीवैखानसागमविभागः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति

# वेदवेद्यस्य भगवतः श्रीवेङ्कटेश्वरस्य पञ्चमूर्तिप्रकारकथनम्

**डा. पराशरं भावनारायणाचार्यः**

**प्रस्तावना -"अपौरुषेयं वाक्यं वेदः"** पुरुषोक्तम् आप्तवाक्यादिप्रमाणमनुसृत्य कदाचित् प्रामाणिकं भवति कदाचित् अप्रामाणिकम्। किन्तु वेदवाक्यं सर्वं प्रामाणिकमेव प्रमाणान्तरैः यद् ज्ञातुमसाध्यं तत् वेदात् विदितं भवति इति वेदस्य वेदत्वव्यवहारः सार्थकः।

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**
**येनं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥**[1]

**वेद्यशब्दार्थः –** विद धातुः सत्तार्थकः ज्ञानार्थकः विचारार्तकः इति आत्मनेपद परस्मैपदभेदेन नानार्थको विद्यते। लाभार्थकोऽपि इति रुधादिषु दृष्टः। वेदेषु लभ्यः, वेदैः विवेचनीयः वेदैरेव ज्ञेयः, वेदेभ्यः ज्ञातुमर्हः, वेदैः ज्ञातुं शक्यो वा वेदवेद्यो भवति इति वेद्यशब्दस्य कृद्वृत्तेः नानार्थबोधः भवत्येव।

यथा पुरुषोत्तमशब्दः श्रीमन्नारायणे एव रूढः तथैव वेदवेद्यशब्दोऽपि। यदाहुः सम्प्रदायिकाः –

**वेदवेद्ये परे पुंसि जाते दसरथात्मजे।**
**वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना॥**[2]

**वेङ्कटेशस्य वेदवेद्यत्वम् –** ऋग्वेदे अष्टमाष्टके अष्टमाध्याये त्रयोदशवर्गे श्रीनिवासस्य स्तुतिः वर्तते इति भगवतः वेदवेद्यत्वं वेङ्कटाचलमाहात्म्यप्रतिपादकेषु पुराणेषु सिद्धम्। यथा श्रीमद्रामायणे रामो वेदवेद्यः नारायणः तथा ऋग्वेदे श्रीनिवासः श्रीमन्नारायणः इति वेङ्कटेशस्य वेदवेद्यत्वम्। वेङ्कटेश्वर इतिहाससमालायाम् एषोऽर्थः श्रीमद्रामायणप्रियशिष्यैः अनन्ताचार्यैः विस्तरेण व्याख्यातः।

**अरायि काणे विकटे गिरिं गच्छ सदान्वे ।**
**शिगिम्बिठस्य सत्त्वभिः तेभिष्ट्वाचातयामसि॥**[3]

तेभिः तैः श्रीनिवासभक्तैः त्वात्वां, सद्रस्रशीर्षं देवमित्यादिष्विवात्र प्रथमार्थे द्वितीया छान्दसी। शिरिम्बिठशब्दोऽत्राकांक्षासामर्थ्यात् द्वितीयान्तस्सन्ननुषज्येत। शिरिम्बिठं श्रीनिवासम्। चातयामसि। चातयितुं प्रार्थयितुम् अर्हसि। चते चदे याचने च इति हि धातुः। यद्वा धातोः अनेकार्थत्वात् समर्पयितुमर्हसीत्यर्थः। इदानीं तु त्वाशब्दो यथा स्वविभक्त्यैवार्थवान्। शिरिम्बिठस्येति षष्ठ्यन्त-स्यैवचानुषङ्गः। तथा च। यथोक्तानिष्टप्रसङ्गे श्रीनिवासस्य गिरिं तद्भक्तैस्सह गत्वा तद्भक्तमुखेनैव तं स्वाभीष्टं याचितुमर्हसीति वा। तद्भक्तमुखेनैव स्वात्मानं तस्य समर्पयितुमर्हसीति वा वेदपुरुषोपदेशः फलितो भवतीति। अत्र श्रीनिवासगिरेः श्रीनिवासस्य च श्रीनिवासभक्तद्वारेणोपसदनीयतायाः स्पष्टतरं श्रूयमाणतया वैष्णवक्षेत्रत्वमेवास्य दुरपह्नवं सिद्ध्यति। एवं वेदवेद्यः श्रीमन्नारायणः एव कलियुगे वेङ्कटनायकः नाम्ना विराजते।

**कुञ्चिकाशब्दाः –** श्रीशः, श्रीनिवासः, श्रीशास्त्रं, भगवच्छास्त्रं, निगम, पर, व्यूह, विभव, अन्तर्यामि, अर्चासमाधि इत्यादयः।

**वेङ्कटेश्वरः –**

वेम्-पापम् कटति-दहति इति वेङ्कटशब्दः आगमेषु निरुक्तः। तथाविधः ईश्वरः वेङ्कटेश्वरः ईष्टे ईशनं शीलमस्य इति वा ईश्वरः ईश धातोः स्थेश भास पिसकसो वरच् इति ताच्छीलिको वरच् प्रत्ययः। ईश्वरस्तु क्लेशकर्मविपाकाशयैः अपरामृष्टः इति दर्शनेषु ईश्वरस्वरूपं दृश्यते।

**"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः[4]"**

श्रीमन्नारायणः स्वयं ईश्वरः विकाररहितोऽपि असतां विग्रहार्थाय सतां रक्षणाय धर्मसंस्थापनाय युगे युगे भुवमवतरति। पुराणेषु भगवतो अवताराः प्रसिद्धाः एव। श्रीमद्भागवते प्रथमस्कन्दे तृतीयाध्याये हरेः अवताराः असंख्येयाः, देवादयः अपि हरेः अंशजाः किन्तु तद्रहस्यं ज्ञातुं मनुष्यः न शक्तोऽपि येन केनापि अवताररूपेण हरिं स्मरन् दुःखसमुदायात् मुक्तो भवति इति विशेषेण निरूपितम्।

**अवताराद्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः ।**
**यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः।।**
**जन्म गुह्यं भगवतो य एतत्प्रयतो नरः ।**
**सायं प्रातर्गणान् भक्त्या दुःखग्रामाद्विमुच्यते[5]।।**

एवं विधानाम् अवताराणां मध्ये कलियुगे वेङ्कटेश्वरः एव विबव अवतारो भुवम् अवतीर्णः जनान् पाति। पुराणेषु सगुणनिर्गुणभेदमनुसृत्य भगवतः चतुर्व्यहत्वं प्रतिपादितम्। वासुदेवो निर्गुणः, अनिरुद्धः सत्वगुणात्मकः, सङ्कर्षणो तामसः, प्रद्युम्नो राजसः इति। आगमेषु अर्चाविधानमनुसृत्य भगवतः पञ्चव्यूहत्वमङ्गीकृतम्। पर, व्यूह, विभव, अर्चा, अन्तर्यामिरूपाः पञ्चव्यूहाः वैखानसागमेषु पठिताः।

**1.परव्यूहस्वरूपम् –**

तत्र परोनाम[6] त्रिपाद्विभूतौ कुमुदकुमुदाक्षपुण्डरीकवामन शङ्खुकर्ण-सर्पनेत्र सुमुख सुप्रतिष्ठादिभिः दिव्यायुधभूषणपरिजनपरिच्छ-दान्वितैः दिव्यनगरपालकैः परिरक्षिते श्रीमद्वैकुण्ठाख्ये पुरे चण्ड प्रचण्ड भद्र सुभद्र जय विजय धातृ विधातृ प्रभृतिभिः द्वारपालकैः उपेते श्रीमद्दिव्यालये श्रीमद्रामणिमण्डपे धर्माद्यष्टपादविरचित सिंहासने शेषपर्यङ्के चतुर्भुजः दिव्यमङ्गलविग्रहविशिष्टः श्रीभूनी-लादिसहितः शङ्खचक्रादि दिव्यायुधोपेतः, किरीटादिदिव्यभूषण-भूषितः अनन्तगरुडविष्वक्सेनादिभिः नित्यैः सामगानपरैः अन्यैः मुक्तैश्च अनुभूयमानो ज्ञानशक्त्यादि अनन्तकल्याणगुणविशिष्टः परब्रह्मादि वासुदेवादि शब्दवाच्यो नारायणः।

**2.व्यूहस्वरूपम् –**

**पञ्चधा तु पुनर्व्यूहः प्रोच्यते श्रुतिसम्मतः।**
**देवो विष्णवादिभेदेन पञ्चधा व्यवतिष्ठते ।।**
**स वा एष पुरुषः पञ्चधा पञ्चात्मेति च श्रुतिः।**
**तथा पोपूयमानः पञ्चभिस्स्वगुणैरिति।।[7]**

उपासनार्थं जगतः सृष्ट्यै परमात्मा पञ्चधा भवति ते एव व्यूहशब्देन व्यवहृताः। व्यूहेषु विष्णु, पुरुष, सत्य, अच्युत, अनिरुद्धाः मुख्यव्यूहाः। एतेभ्यः व्यूहेभ्यः केशवादि चत्वारिंशत् मूर्तयः भवन्ति।

**3. विभवः –**

एकविंशति अवतारेषु परिगणितेष्वपि मुख्याः दश विबवव्यूहे परिगणिताः।

विभवो नाम [8]तत्तत् सजातीयरूपेण आविर्भावः स प्रसिद्धि प्राधान्येन दशधा ते च मत्स्यकूर्मादयो अवतारविशेषाः। तत्र –

1. वेदापहारि दैत्यनिरासपूर्वकं ब्रह्मणे प्रमाण प्रदानार्थं अवतीर्णो मत्स्यावतारः।
2. जीवानाम् अजरामरणहेतुभूतामृतोत्पादनमन्थराधारत्वेन अवतीर्णः कूर्मावतारः।
3. संसारनिमग्न जनोद्धारणकामः स्वमहिषीं उद्धर्तुं अवतीर्णः वराहावतारः।
4. आश्रितरक्षणार्थं महासुरं हन्तुं स्तम्भोद्भूतो नारसिंहावतारः।
5. त्रिविक्रमो भूत्वा स्वपादारविन्दोद्भवेन जलेन जगद्रक्षणार्थं अवतीर्णः वामनावतारः।
6. दुष्टक्षत्रियनिरसनार्थं अवतीर्णः परशुरामावतारः।
7. धर्मसंस्थापनार्थं अवतीर्णो रामावतारः।
8. प्रलम्बादिनिरसनार्थं अवतीर्णो बलभद्ररामावतारः।
9. चरमोपायप्रदानार्थं अवतीर्णो कृष्णावतारः।
10. अधर्मिष्ठान् निरस्य पूर्णधर्मप्रवर्तनार्थः कल्क्यवतारः।

**मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः।**
**रामो रामश्य रामश्य कृष्णः कल्की इमे दश।।**

**4.अर्चाव्यूहस्वरूपम् –**

श्रीमन्नारायणं उपासनायोग्यं अभीष्टाकृतिं परिकल्प्य स्नानभोजन आसनशयनादिभिः अर्चनम् अर्चाव्यूहः। स च स्वयंव्यक्तः, दैव, सिद्ध, मानुषकृतभेदेन चतुर्विधः।

अर्चावतारो नाम[9]देशकालविप्रकर्षरहितः आश्रिताभिमतद्रव्यं शरीर-तया स्वीकृत्य, तस्मिन् अप्राकृत शरीरविशिष्टस्सन् अर्चक पराधीनस्स्नान भोजनासन शयनस्थिति सर्वसहिष्णुः परिपूर्णो गृहग्रामनगर प्रशस्तशैलादिषु वर्तमानो मूर्तिविशेषः।

चतुर्विधेषु अर्चारूपेषु श्रीवेङ्कटेश्वरः स्वयं आविर्भूतः विजयतेतराम् इति प्रकीर्णाधिकारे स्पष्टम् उपपादितम्।

**धर्मग्लानिरधर्मस्य वृद्धिर्यावद्भविष्यति ।**
**तद्धर्ता महाविष्णुः सृजत्यात्मानमात्मना ।।**
**श्रीनिवासो जनावासो श्रीनिवासः स्वयं हरिः।**
**श्रीनिवासस्समाख्यातो भूमाववतरिष्यति ।।**
**उत्पत्स्यमास एवाऽसौ भ्राज्यमानस्स्वतेजसा।**
**जगदावरणं क्रूरं तमः पुञ्जं हनिष्यति।।**[10]

**5.अन्तर्यामिव्यूहस्वरूपम् –**

अन्तर्यामित्वं नाम [11]स्वर्गनरकाद्यनुभवदशायामपि जीवात्मनः सुहृत्वेन योगिभिः द्रष्टव्यतया हृदयप्रदेशावस्थितरूपम्। जीवेन साकं विद्यमानोऽपि तद्गतदोषैः असंस्पृष्टो वर्तते।

**उपसंहारः –**

व्यूहपञ्चकेऽपि अर्चारूपेण विराजमानः वेङ्कटाद्रौ स्वामिपुष्क-रिण्याः नैरुतिदिग्भागे आनन्दनिलये विराजमानः, दिव्याभरण दिव्यदेहधारी, श्रीवत्सचिह्नधारी यज्ञोपवीत ऊर्ध्वपुण्ड्र तोरण पुष्पमाला विराजितः वेदवेद्यो भूत्वा "**अरायिकाणे विठं वेदाहमेतं**

**पुरुषं महान्त"** इत्यादि मन्त्रप्रतिपाद्यो भूत्वा सकृत् दर्शनमात्रेणापि भक्तान् सर्वमङ्गलैः अनुगृह्णाति।

**श्रीवेङ्कटाद्रि श्रृङ्गाग्रमङ्गलाभरणाङ्घ्रये ।**
**मङ्गलानां निवासाय श्रीनिवासाय मङ्गलम्।।**

**सङ्केताक्षरसूची –**

1. पु.लो – पुराणपर्यालोचनम्
2. श्री.रामा – श्रीमद्रामायणम्
3. श्रीवे.इ.माला – श्रीवेङ्कटाचलेतिहासमाला
4. पा.यो – पातञ्जलयोगदर्शनम्
5. श्री.भा – श्रीमद्भागवतम्
6. य.म – यतीन्द्रमतदीपिका
7. प्रकीर्णे - प्रकीर्णाधिकारः

**उपयुक्तग्रन्थसूची –**


1. पुराणपर्यालोचनम् – आचार्य कृष्णमणि त्रिपाठी, चौखम्बा संस्कृत सिरीज् आफीस्, वाराणसी – 2012.
2. श्रीमद्रामायणम् – परिमला पब्लिकेषन्स्, वाराणसी – 2010.
3. श्रीवेङ्कटाचलेतिहासमाला – श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः – 2009.
4. पाञ्जजलयोगदर्शनम् – चौखम्बा प्रकाशन, वाराणसी – 2014.
5. श्रीमद्भागवतम् – गीताप्रेस्, गोरखपूर् – 2009.
6. यतीन्द्रमतदीपिका – TTD, Publications, series No-895, 2011.
7. प्रकीर्णाधिकारः – भृगुप्रोक्तम् - TTD, Publications, series No-483, 1997.


**पाद टिप्पणी –**

1 पु.लो – प्रथमपरिच्छेदः, पुटसंख्या - 25

2 श्री.रामा – पीठिका – पुटसंख्या – 15, by कृष्णस्वामिशास्त्री

3 श्रीवे.इ.माला - प्रथमस्तबकः – पुटसंख्या – 18-19

4 पा.यो – समाधिपादः – 24 सूत्रम् – पुटसंख्या - 76

5 श्री.भा – प्रथमस्कन्धः – 3/26, 29 श्लोकाः, पुटसंख्या – 37.

6 य.म – पुटसंख्या – 5.

7 य.म – प्रकीर्णे – 33/13, 14 श्लोकाः.

8 य.म – नवमोऽवतारः, प्रकीर्णे – 13/4 श्लोकः, पुटसंख्या – 07.

9 य.म – नवमोऽवतारः - पुटसंख्या – 09.

10 य.म – प्रकीर्णाधिकारः – 37/146, 147, 148 श्लोकाः।

11 य.म – नवमोऽवतारः - पुटसंख्या – 09.